रसालसा, स्त्री, ( रसेन अलसा । ) नाडी । इति शब्दचन्द्रिका ॥

रसाला, स्त्री, ( रसान् आलातीति । आ+ला+कः । टाप् ।) रसना । दूर्व्वा । विदारी । इति मेदिनी ॥ द्राक्षा । इति शब्दरत्नावली ॥ शिखरिणी । तत्पर्य्यायः । मार्ज्जिता २ । इत्यमरः ॥ तस्याः करणप्रकारो यथा,—

"आदौ माहिषमम्लमम्बुरहितं दध्याढकं शर्करां
शुभ्रां प्रस्थयुगोन्मितां शुचिपटे किञ्चिच्च कश्चित् क्षिपेत् ।
दुग्धेनार्द्धघनेन मृण्मयनवस्थाल्यां दृढं स्रावये-
देलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च तद्योजयेत् ॥
भीमेन प्रियभोजनेन रचिता नाम्ना रसाला स्वयं
श्रीकृष्णेन पुरा पुनःपुनरियं प्रीत्या समास्वादिता ।
एषा येन वसन्तवर्ज्जितदिने सेव्या परं नित्यश-
स्तस्य स्यादतिवीर्य्यवृद्धिरनिशं सर्व्वेन्द्रियाणां बलम् ॥
ग्रीष्मे तथा शरदि ये रविशोषिताङ्गा
ये च प्रमत्तवनितासुरतातिखिन्नाः ।
ये चापि मार्गपरिसर्पणशीर्णगात्रा-
स्तेषामियं वपुषि पोषणमाशु कुर्य्यात् ॥
रसाला शुक्रला बल्या रोचनी वातपित्तजित् ।
दीपनी बृंहणी स्निग्धा मधुरा शिशिरा सरा ।
रक्तपित्तं तृषां दाहं प्रतिश्यायं विनाशयेत् ॥"

इति राजनिर्घण्टः ॥

अपि च ।

"दध्नोऽर्द्धाढकमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः
प्रस्थं चोडपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्म्माषकान् ।
एलामाषचतुष्टयं मरिचतः कर्षं लवङ्गं तथा
धृत्वा शुक्लपटे शनैः करतलेनोन्मथ्य विस्रावयेत् ॥
मृद्भाण्डे मृगनाभिचन्दनरसस्वेदेऽगुरुद्धूपिते
कर्पूरेण सुगन्धितं तदखिलं संलोड्य संस्थापयेत् ।
स्वस्वार्थे मथुरेश्वरेण रचिता ह्येषा रसाला स्वयं
भोक्तुर्म्मन्मथदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥"

इति भावप्रकाशः ॥

रसालिहा, स्त्री, शीर्णनाला । इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥

रसाली, स्त्री, ( रसान् आलाति या । आ+ला+कः । ङीप् । ) पुण्ड्रकेक्षुः । इति राजनिर्घण्टः ॥

रसाश्वासा, स्त्री, पलाशीलता । इति राजनिर्घण्टः ॥

रसास्वादः, पुं, ( रसस्य आस्वादः । ) अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनम् । समाध्यारम्भसमये सविकल्पानन्दास्वादनं वा । इति वेदान्तसारः ॥*॥ "चतुर्थं विघ्नमाह अखण्डेति । उक्तसविकल्पकसमाध्योर्म्मध्ये द्वितीयः शब्दानुविद्धस्त्रिपुटीविशिष्टस्तस्मिन् य आनन्दो बाह्यशब्दादिविषयप्रपञ्चभारत्यागप्रयुक्तो न तु चैतन्यप्रयुक्तः । यथा निधिग्रहणाय प्रवृत्तस्य निधिपरिपालकभूतप्रेताद्यावृतस्य निधिप्राप्तेः अभावेऽपि भूताद्यनिष्टनिवृत्तिमात्रेण कोऽपि महानानन्दो भवति तथा सविकल्पकसमाधावखण्डवस्त्वनवलम्बनेन नित्यानन्दरसास्वादनाभावेऽपि अनिष्टबाह्यप्रपञ्चनिवृत्तिजन्यानन्दं सविकल्पकरूपं ब्रह्मानन्दभ्रमेण स्वादयति तद्रसास्वादनमित्यर्थः । लक्षणान्तरमाह समाधीत्यादि । निर्व्विकल्पकसमाध्यारम्भकाले अनुभूय मानसविकल्पकानन्दत्यागासहिष्णुतया पुनस्तस्यैवास्वादनं रसास्वाद इत्यर्थः ।" इति सुबोधन्याख्या तट्टीका ॥

रसास्वादी, [ न् ] पुं, ( रसं मधु आस्वादयितुं शीलमस्य । आ+स्वद्+णिनिः । ) भ्रमरः । इति शब्दमाला ॥ रसास्वादविशिष्टे, त्रि ॥

रसाङ्कः, पुं, ( रसः आङ्का आख्या यस्य । ) सरलद्रवः । इति रत्नमाला ॥

रसिकः, पुं, (रसोऽस्त्यस्यास्मिन्निति वा । रस+ठन् ।) सारसपक्षी । इति राजनिर्घण्टः ॥ तुरङ्गः । हस्ती । इति सारस्वतः ॥ सरसे, त्रि । इति मेदिनी ॥ ( यथा, भागवते । १ । १ । ३ ।

"पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥")

रसिका, स्त्री, ( रसिक+टाप् । ) रसाला । इक्षुरसः । इति मेदिनी ॥ काञ्ची । रसना । इति विश्वः ॥

रसिकेश्वरः, पुं, ( रसिकानां रसज्ञानामीश्वरः । ) श्रीकृष्णः । यथा,—

"वृन्दावनान्तरे रम्ये रासोत्सवसमुत्सुकम् ।
रासमण्डलमध्यस्थं नमामि रसिकेश्वरम् ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३२ अध्यायः ॥

( रसिकश्रेष्ठश्च ॥ )

रसितं, क्ली, ( रस शब्दे+भावे क्तः । ) मेघनिर्घोषः । इत्यमरः ॥ रुतम् । स्वर्णादिखचिते, त्रि । इति मेदिनी ॥

रसुनः, पुं, ( रस+उनन् । ) लशुनः । इति शब्दचन्द्रिका ॥(विवरणमस्य रसोनशब्दे ज्ञातव्यम्॥)

रसेन्द्रः,, पुं, ( रसानां धातुरसानामिन्द्रः श्रेष्ठः । ) पारदः । इति राजनिर्घण्टः ॥ ( यथा, भावप्रकाशे । १ । १ ।

"असाध्यो यो भवेद्रोगो यस्य नास्ति चिकित्सितम् ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥"

अस्य पर्य्यायादिकं रसशब्दे द्रष्टव्यम् ॥ )

रसोत्तमः, पुं, ( रसेषु उत्तमः । यद्वा, रसः उत्तमोऽस्य । ) मुद्गः । इति राजनिर्घण्टः ॥ श्रेष्ठरसश्च ॥

रसोद्भवं, क्ली, ( रसात् पारदधातोरुद्भवतीति । उत्+भू+अच् । ) हिङ्गुलम् । इति राजनिर्घण्टः ॥ रसजाते, त्रि ॥

रसोनः, पुं, (रसेनैकेनोनः ।) रसुनः । इति राजनिर्घण्टः ॥ (तस्योत्पत्तिर्यथा,—

"राहोरमृतचौर्य्येण लूनाद् ये पतिता गलात् ।
अमृतस्य कणा भूमौ ते रसोनत्वमागताः ॥
द्विजा नाश्नन्ति तमतो दैत्यदेहसमुद्भवम् ।
साक्षादमृतसम्भूतेर्ग्रामणीः स रसायनम् ॥"

इति वाभटे उत्तरस्थाने ३६ अध्यायः ॥

"अथ वीर्य्यञ्च वक्ष्यामि रसोनस्य महामते ।
रसैश्च पञ्चभिर्युक्तो रसोनस्तेन वर्जितः ॥"
"दृष्टा वातादिशमनो रसोनो विहितो बुधैः ।
जाङ्गलानि रसान्येव भोजनार्थे प्रदापयेत् ॥"

इति हारीते कल्पस्थाने तृतीयेऽध्याये ॥

अथास्य गुणाः ।

"रसोनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः ।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ॥
भग्नसन्धानकृत्कण्ठ्यो गुरुः पित्तास्रवृद्धिदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥"

इति च भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ अन्यद्विवरणमस्य रसोनकशब्दे लशुनशब्दे च द्रष्टव्यम् ॥ )

रसोनकः, पुं, ( रसोन+स्वार्थे कन् । ) रसुनः । तत्पर्य्यायः ।

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥"

तस्योत्पत्तिर्यथा,—

"यदामृतं वैनतेयो जहार सुरसत्तमात् ।
तदा ततोऽपतद्विन्दुः स रसोनोऽभवद्भुवि ॥
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्ज्जितः ।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥"

अस्यावयवगुणाः ।

"कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ।
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः ॥"

अस्य भक्षणगुणाः ।

"रसोनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः ।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ॥
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तास्रवृद्धिदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥
हृद्रोगजीर्णज्वरकुक्षिशूल-
विबन्धगुल्मारुचिकासशोफान् ।
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति ॥
मद्यं मांसं तथाम्लञ्च हितं लशुनसेविनाम् ॥
व्यायाममातपं रोषमतिनीरपयो गुडम् ।
रसोनमश्नन् पुरुषस्त्यजेदेतन्निरन्तरम् ॥"

इति भावप्रकाशः ॥

( तथास्यान्या विवृतिर्यथा,—

"अमृतमथने जातः सुरासुरमहो महान् ।